दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-177 | 1 | अप्रैल 19, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लतृतीया
बैशाख 06 प्रविष्ठांशः मङ्गलमयः भवेत्

2 Himachal News - द्विलक्षाधिक-वार्षिक-आययुक्ताभ्यः महिलाभ्यः 1500-रूप्यकाणि न -प्रदास्यते, योजनायां संशोधनम्

3 हिमाचले मुख्यमंत्रिणः आरभ्य विधायकपर्यन्तं वेतनस्य अंशः षण्मासपर्यन्तं स्थगितः, अधिसूचना निर्गता

4 ज्योतिषशोधकेन्द्रपण्डितसभायाः सम्पन्नता संवत् १४३४ (२०२६-२०२७) पंचाङ्गाणां तिथिसमन्वयः सर्वसम्मत्या निश्चितः

## केन्द्रीय-मन्त्रिमण्डलेन 'भारत-समुद्रीय-बीमा-कोषः' इति नाम्ना एकस्य देशान्तर योगक्षेम-कोषस्य निर्माणाय स्वीकृतिः



केन्द्रीय-मन्त्रिमण्डलेन 'भारत-समुद्रीय-बीमा-कोषः' इति नाम्ना एकस्य देशान्तर योगक्षेम-कोषस्य निर्माणाय स्वीकृतिः प्रदत्ता। अस्य कृते अशीत्युत्तरनवशताधिक द्वादशसहस्र कोटि-रूप्यकाणां 'सार्वभौम-प्रत्याभूतिः' अपि प्रदत्ता, येन निरन्तरं समुद्रीय-बीमा-सुविधा उपलभ्येत। मन्त्रिमण्डल-सभायाः अनन्तरं नवदिल्ल्यां वार्ताहरैः सह वार्तालापावधौ सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः उक्तवान् यत्, एषः कोषः सुनिश्चितं करिष्यति यत् भारतीय-व्यापाराय अन्ताराष्ट्रिय स्थानेभ्यः भारतं प्रति, भारततः च बहिः गच्छतां पोतानां कृते सुलभ-बीमा-सुविधा प्राप्येत। असाधु-समुद्रीय-मार्गेषु गमनागमन-समये अपि एषा सुविधा सुलभा भविष्यति। एषः निर्णयः अस्य वर्षस्य जनवरी-मासस्य प्रथमदिनाङ्कतः प्रभावि भविष्यति ।

## तमिळनाडु-राज्ये कोयम्बत्तूरनगरे प्रधानमन्त्रिणः निर्वाचनप्रचारः



तमिळनाडु-राज्ये प्रधानमन्त्री भाजपेति दलस्य वरिष्ठनेता च नरेन्द्रमोदी राष्ट्रिय जनतान्त्रिक-गठबन्धनस्य अभ्यर्थिनां पक्षे मतदानार्थं कोयम्बत्तूर-नगरे प्रचारं करिष्यति। विमानपत्तनात् कार्यक्रमस्थलं 'कोडीशियां' प्रति सः मार्ग-प्रदर्शन माध्यमेन यास्यति। अपरपक्षे, डी.एम. के. प्रमुखः मुख्यमन्त्री च एम. के. स्टालिन् 'परिसीमन-विधेयकमालक्ष्य भाजपेति दलस्य अथ च ए.आई.ए.डी.एम. के इत्यस्य आलोचनां कुर्वन् अस्ति। काङ्ग्रेस-नेता राहुल गान्धी पोन्नेरी-क्षेत्रे प्रचारं कुर्वन् राज्येन सह स्वस्य आत्मीयसम्बन्धं स्मृतवान्।

# राष्ट्रं सम्बोधयन् प्रधानमंत्री कथितवान् सर्वकाराय राष्ट्रहितं सर्वोपरि अस्ति



हिमसंस्कृतवार्ता। प्रधानमंत्री नरेन्द्रमोदी अवदत् यत् सर्वकाराय राष्ट्रहितं सर्वोपरि अस्ति। राष्ट्रं सम्बोधयन् प्रधानमंत्री कथितवान् यत् सर्वकारस्य निष्ठापूर्णप्रयासानां सत्यपि 'नारीशक्ति वंदन अधिनियम' इत्यस्य संशोधनेन सम्बद्धं विधेयकं लोकसभायां पारितं भवितुं न अशक्नोत्। सः अवदत् यत् एतदर्थं सः सर्वाः मातृः भगिनीः च प्रति क्षमां याचते। श्रीमोदी कथितवान् यत् यदा केषाञ्चन जनानां कृते तेषां दलमेव सर्वस्वं भवति, तदा महिलासशक्तिकरणं राष्ट्रहितं च उभयम् अपि अस्य दुष्परिणामं सहते। प्रधानमंत्री अवदत् यत् महिला-आरक्षणं समयस्य आवश्यकता अस्ति। सः अवदत् यत् एतत् दृष्ट्वा महद् दुःखं जातं यत् महिलानां हिताय निर्मितम् एतत् विधेयकं निरस्तं कृतम्, यदा तु कांग्रेस-द्रमुक-सपा-तृणमूलकांग्रेससदृशानि दलानि करतलवादनं कुर्वन्ति स्म, महिलानां अधिकारान् च अपहृत्य उत्पीठिकाः ताडयन्ति स्म। प्रधानमंत्री तेषाम् एतत् कृत्यं महिलानां गरिमायाः आत्मसम्मानस्य च उपरि प्रहारः इति अघोषयत्। प्रधानमंत्री अवदत् यत् नारीशक्ति वंदन संशोधनं समयस्य आह्वानम् अस्ति तथा च एतत् उत्तर-दक्षिण-पूर्व-पश्चिमसहितं सर्वेषु क्षेत्रेषु सन्तुलितं सशक्तीकरणं सुनिश्चितं कर्तुम् एकः प्रयासः आसीत्। सः अवदत् यत् अस्य विधेयकस्य उद्देश्यं संसदि आनुपातिकप्रतिनिधित्वं वर्धयित्वा लघु-बृहत्-प्रत्येकं राज्यस्य स्वरं सुदृढं करणम् आसीत्, परन्तु एतं पवित्रं प्रयासं कांग्रेसेन तस्य सहयोगीभिः च पददलितं कृतम्। स्वसम्बोधने प्रधानमंत्री अवदत् यत् यानि दलानि परह्यः संसदि नारीशक्ति वंदन संशोधनस्य विरोधं कृतवन्तः, ते महिलानां शक्तिं उपेक्षन्ते। सः अवदत् यत् महिला-आरक्षणस्य विरोधं कृत्वा विपक्षेण यत् पापं कृतं, तस्य दण्डं ते अवश्यमेव प्राप्स्यन्ति।

# संसदि लोकसभा राज्यसभा चोभे सदने अनिश्चितकालाय स्थगिते

संसदि लोकसभा राज्यसभा चोभे सदने गतदिने अनिश्चितकालाय स्थगिते। अनेन सह अस्य वर्षस्य जनवरी मासस्य अष्टाविंशतिः दिनाङ्कात् आरब्धं एतत् आय-व्यय-सत्रम् समाप्तिं गतम् । लोकसभायां समापनाभिभाषणे अध्यक्षः ओम बिरला अवदत् यत् आय व्यय-सत्रस्य कालखण्डे सदनस्य उत्पादकता त्रिनवतिः-प्रतिशतमिता आसीत्। सहैव सदनस्य अधुना यावत् एकत्रिंशत् उपवेशनानि जातानि । श्री बिरला अवदत् यत् सत्रस्य कालखण्डे द्वादश-प्राशासनिक विधेयकाः प्रस्तुताः, तथा च नव-विधेयकाः पारिताः अभवन्। एतेषु षड्विंशत्यधिकद्विसहस्रतमवर्षस्य वित्त विधेयकः पञ्चविंशत्यधिकद्विसहस्रतमवर्षस्य ऋणग्रस्तं संशोधनं विधेयकः, षड्विंशत्यधिकद्विसहस्रतमवर्षस्य आन्ध्रप्रदेश-पुनर्गठनस्य संशोधन-विधेयकः, षड्विंशत्यधिकद्विसहस्रतमवर्षस्य जनविश्वास प्रावधान संशोधन विधेयकः षड्विंशत्यधिकद्विसहस्रतमवर्षस्य तथा केन्द्रीय सशस्त्र-आरक्षि-बल विधेयकः च समाविष्टाः सन्ति। शून्यकाले सदस्यैः षड्विंशत्यधिकैकशत संख्यकाः सार्वजनिक महत्त्वस्य विषयाः उपस्थापिताः। अध्यक्षः सी. पी. राधाकृष्णन् उक्तवान् यत् सदनमाहत्य अस्य सत्रस्य उत्पादकता प्रायः राज्यसभायां समापनाभिभाषणे सप्तपञ्चाशतदधिकैकशतहोरा पर्यन्तं संचालितम्। दशाधिकैकशतप्रतिशतमिता आसीत्। राज्यसभा अध्यक्षः अवदत् यत् सत्रस्य कालखण्डे प्रधानमन्त्री नरेन्द्र मोदी पश्चिम एशियायां प्रवर्तमानस्य संघर्षस्य विषये तथा भारतस्य समक्ष उपस्थितासु, विशेषतः ऊर्जा आवश्यकतानां पूर्तिमालक्ष्य वक्तव्यं प्रदत्तवान्। सः अवदत् यत् सदने वाणिज्य-उद्योग-मन्त्रिणा भारत-अमेरिका-द्विपक्षीय व्यापार-संधि विषये तथा विदेश-मन्त्रिणा पश्चिम एशियायाः स्थितेः विषये प्रदत्तेषु स्व-संज्ञान-वक्तव्येषु अपि ध्यानं दत्तम्।

## सुभाषितम्

**विद्या ददाति विनयं,
विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति,
धनाद्धर्मं ततः सुखम्॥**

भावार्थः- विद्या मनुष्य को नम्रता देती है और नम्रता से योग्यता, योग्यता से धन, धन से धर्म फिर धर्म से सुख पाता है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## ग्रीष्मस्य आर्द्रतायाः च प्रकोपे सत्यपि पश्चिमबङ्गे राजनैतिक प्रचारः तीव्रतरः

ग्रीष्मस्य आर्द्रतायाः च प्रकोपे सत्यपि, पश्चिमबङ्गे विधानसभा निर्वाचनार्थं राजनैतिक प्रचारः तीव्रतरः जातः। तृणमूल-काङ्ग्रेस-प्रमुखः मुख्यमन्त्री च ममता बनर्जी स्वदलस्य अभ्यर्थिनां समर्थनार्थं हावड़ा-मण्डले एकां जनसभाम् अकरोत्। तृणमूल-नेता अभिषेक बनर्जी एकेन मार्ग-प्रदर्शनेन सह सम्मिलितः, सः पूर्व-बर्धमान-मण्डले अन्यासु जनसभासु अपि भागं ग्रहीष्यति इति सम्भावना वर्तते। भाजपा-नेता प्रतिपक्षनेता च सुवेन्दु अधिकारी पूर्व-मेदिनीपुर-मण्डले एकां जनसभाम् अकरोत् । असम-उत्तरप्रदेश-मध्यप्रदेशानां भाजपा-दलस्य वरिष्ठनेतारः पश्चिमबङ्गस्य विभिन्न मण्डलेषु जनसभासु भागं गृहीतवन्तः। वामपन्थी-दलानि अन्यानि च राजनैतिकदलानि अपि क्षेत्रेषु लघु-जनसभाः प्रचारान् च कृतवन्तः ।

# Himachal News - द्विलक्षाधिक-वार्षिक-आययुक्ताभ्यः महिलाभ्यः 1500-रूप्यकाणि न -प्रदास्यते, योजनायां संशोधनम्




हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेश-सर्वकारेण इन्दिरागांधीप्रियभगिनी-सुखसमृद्धि-नाम्नी योजनायां संशोधनं कृतम्। निर्वाचन-प्रतिज्ञा-प्रवर्तनकाले वार्षिक-आयस्य काचित् अपि नियमः न स्थापितः आसीत्, किन्तु १५ अप्रैल-दिने हिमाचलदिवसस्य अवसरे किन्नौर-जनपदे योजनायाः प्रवर्तनसमये वार्षिक-आय-नियमः समाविष्टः।संशोधनानन्तरं अधुना 1500-रूप्यकाणां लाभार्थं महिलाभ्यः पुनः आवेदनं कर्तव्यम्। पूर्वं कृतानि आवेदनानि अमान्यानि भविष्यन्ति। राज्यस्य प्रत्येक-गृहे स्थिताभ्यः महिलाभ्यः आर्थिक-सहाय्यं दातुम् इति यः अभिप्रायः आसीत्, सः अधुना वार्षिक-आय-नियमस्य आरोपणेन सीमितः कृतः। येषां वार्षिक-आयः द्विलक्ष-रूप्यकात् अधिका अस्ति, ताः महिलाः प्रतिमासं 1500-रूप्यकाणि न प्राप्स्यन्ति। अष्टादश-वर्षात् अधिक-वयस्काभ्यः महिलाभ्यः प्रतिमासं 1500-रूप्यक-प्रदानस्य प्रतिज्ञा आर्थिक-स्वावलम्बनस्य दिशि महत्त्वपूर्णः पादः मन्यते स्म, किन्तु वर्धमान-आवेदन-संख्या, वित्तीय-भारः तथा लक्ष्य-लाभार्थिनां निर्धारणस्य आवश्यकता इत्यादिभिः कारणैः सर्वकारेण पात्रता-मापदण्डाः कठोराः कृताः।

## सर्वा प्रक्रिया पुनः आरभ्यते

सर्वकारेण १८ वर्षात् अधिक-वयस्काभ्यः युवतीभ्यः तथा महिलाभ्यः 1500-रूप्यक-प्रदानस्य घोषणा कृता आसीत्, यस्य अन्तर्गतं लक्षशः आवेदनानि अपि प्राप्तानि। अधुना द्विलक्ष-आय-सीमा-नियमानन्तरं सम्पूर्णा प्रक्रिया पुनः आरभ्यते। महिलाभ्यः परिवारस्य वार्षिक-आयः द्विलक्ष-रूप्यकात् न्यूनः अस्ति इति प्रमाणपत्रं दातव्यम्।
तथैव बीपीएल-वर्गस्य महिलाः अपि अस्यां योजनायां सम्मिलिताः भविष्यन्ति। नवीन-आवेदन-पत्रे अस्य कृते पृथक् स्तम्भः भविष्यति। हिमाचलप्रदेश-सामाजिकन्याय-एवं-अधिकारिताविभागस्य निदेशकः सुमित-खिम्टा उक्तवान् यत् सर्वकारस्य आदेशप्राप्तौ योजनायाः अन्तर्गतं नवीन-आवेदन-पत्राणि पूर्यन्ते।

**महिलाभ्यः एतानि पात्रता-मापदण्डानि पूरयितव्यानि**

योजनायाः अन्तर्गतं प्रतिमासं 1500-रूप्यक-सहाय्यार्थं महिलाभ्यः अन्येऽपि मापदण्डाः पूरयितव्याः—
> केवलं राज्यस्य स्थायी-निवासिन्यः महिलाः पात्राः स्युः।
> आयुः १८ वर्षात् ५९ वर्षपर्यन्ता भवेत्।
> बौद्ध-मठेषु स्थायिरूपेण वसन्त्यः बौद्ध-भिक्षुण्यः अपि पात्राः स्युः।

## केषां लाभः न भविष्यति

यदि लाभार्थिन्याः परिवारस्य कश्चित् सदस्यः केन्द्र-राज्य-सर्वकारयोः कर्मचारी अथवा पेंशनभोगी अस्ति, तर्हि लाभः न भविष्यति। तदतिरिक्तं अनुबन्ध-कर्मचारिणः, आउटसोर्स-कर्मचारिणः, दैनिक-वेतनभोगिनः, अंशकालिक-कर्मचारिणः, भूतपूर्व-सैनिकाः, सैनिक-विधवाः, आंगनवाड़ी-कार्यकर्त्र्यः, सहायिकाः, आशा-कार्यकर्त्र्यः, मिड-डे-मील-कार्यकर्त्र्यः, मल्टि-टास्क-कर्मचारिणः, पंचायती-राज-संस्थासु तथा नगर-स्थानीय-निकायेषु कार्यरताः कर्मचारीणः, सार्वजनिक-उपक्रमेषु/बोर्डेषु/परिषदत्सु कार्यरताः तथा पेंशनभोगिनः अपि अपात्राः स्युः।

## आवश्यक-प्रपत्राणि

लाभार्थिन्याः महिलायाः आवेदन-पत्रेण सह निम्नलिखितानि प्रमाणपत्राणि अपेक्षितानि—
> हिमाचल-प्रदेशस्य मूल-निवास-प्रमाणपत्रम् (बोनाफाइड)
> आयु-प्रमाणम्
> वित्तकोषसंख्या- विवरणम्
> आधार-पत्रम्
> शगरीय-क्षेत्रेषु खाद्यान्न परिपत्रम्, ग्रामीण-क्षेत्रेषु परिवार-पञ्जिका
> बौद्ध-भिक्षुणीनां कृते मुख्य-चोमो द्वारा निर्गतं प्रमाणपत्रम्
आवेदन-पत्रं जिला-कल्याण-अधिकारी अथवा तहसील-कल्याण-अधिकारी-कार्यालयात् प्राप्तुं शक्यते।

# गोबिंदसागरतटे धराड़सानीक्षेत्रे आधुनिकक्रीडास्थलस्य निर्माणं भविष्यति; पर्यटनविकासः भविष्यति



हिमसंस्कृतवार्ताः बिलासपुरम् ।कीरतपुर-मनाली चतुष्पथनस्य पार्श्वे गोबिंदसागरझीलस्य तटे स्थिते धराड़सानी क्षेत्रे पर्यटनस्य वृद्धये आधुनिकं 'गेमिंग जोन' (क्रीडाकेन्द्रम्) विकसितं क्रियते। प्राकृतिकसौन्दर्येण परिपूर्णम् एतत् स्थानं अधुना ईदृशमनोरञ्जनकेन्द्ररूपेण विकसितुं योजना अस्ति, यत्र स्थानिकाः पर्यटकाः च समयं व्यतीतं कर्तुं शक्नुवन्ति।
परियोजनायाः मुख्याकर्षणानि:
• **उद्यानविकसः:** एतत् क्षेत्रं कस्यचित् उद्यानस्य (Park) इव विकसिष्यते।
• **क्रीडोपकरणानि: बालकानां कृते विविधाः दोलाः** (झूले) अन्यानि क्रीडोपकरणानि च स्थाप्यन्ते। बालकेभ्यः युवकेभ्यः च अत्र विशेषव्यवस्था अस्ति।
• **छायाचित्रबिन्दुः (Selfie Point):** पर्यटकानां कृते विशेषबिन्दवः निर्मास्यन्ते, यत्र ते गोबिंदसागरझीलस्य सौन्दर्येण सह छायाचित्राणि ग्रहीतुं शक्नुवन्ति।
• **खाद्यक्षेत्रम् (Food Zone):** अत्र स्थानीयव्यञ्जनानां लघुभोज्यपदार्थानां च कृते खाद्यकेन्द्रस्य व्यवस्था भविष्यति।
उद्देश्यं कार्यान्वयनञ्च
परियोजनायाः निर्देशकः अजयहाण्डा महोदयः अवदत् यत् अस्माकं मुख्यं लक्ष्यं बिलासपुरं पर्यटनक्षेत्रे नूतनां परिचयम् अस्मयितुम् अस्ति। वयं इच्छामः यत् अत्र आगच्छन्तः सर्वे जनाः सुखदं अनुभवं प्राप्नुयुः। सः सूचितवान् यत् दोलानां क्रीडोपकरणानां च सामग्री आगता अस्ति, आगामिषु दिनेषु कार्यं तीव्रगत्या भविष्यति।
सुविधाः आर्थिकलाभः च
• **यानवाहनस्थानम् (Parking):** पर्यटकानां कृते सुचारु-वाहनस्थानस्य व्यवस्था अपि भविष्यति।
• **रोजगारस्य अवसराः:** अनया पहलेन स्थानीयस्तरे उद्योगाः वर्धिष्यन्ते। लघुव्यवसायिनां, खाद्यविक्रेतृणां च कृते नूतनाः उपजीविकावसराः सृजिताः भविष्यन्ति।
धराड़सानी क्षेत्रं पूर्वमेव स्वकीयेन प्राकृतिकसौन्दर्येण जनान् आकर्षति। आधुनिकसुविधानां योजनेन एतत् स्थानं बिलासपुरस्य प्रमुखं पर्यटनकेन्द्रं भविष्यति, येन पर्यटकाः अत्र आगन्तुं विवशाः भविष्यन्ति।

# परवाणू-स्थाने निजी-उद्योगे भीषणोऽग्निकाण्डः





हिमसंस्कृतवार्ताः- परवाणू। सोलनजनपदस्य परवाणूस्थे औद्योगिक-क्षेत्रे सेक्टर- २ स्थाने स्थिते कस्यचित् निजी-उद्योगे शनिवासरे आकस्मिकतया अग्निः प्रज्वलितः, येन सर्वत्र कोलाहलः जातः। सः अग्निकाण्डः अतिशय-भीषणः आसीत्, यत् अल्पकाले एव कृष्ण-धूमस्य महद्-मेघः आकाशे व्याप्तः, येन समीप-प्रदेशे आकुलतायाः परिस्थितिः अभवत्। प्रत्यक्षदर्शिनां कथनानुसारं, अग्नि-प्रज्वलनात् शीघ्रमेव उद्योग-परिसरात् घोररूपेण उद्गच्छन् कृष्ण-धूमः सम्पूर्णं क्षेत्रं व्याप्नोत्।घटनायाः सूचना-प्राप्तिमात्रेण अग्निशामक-दलानि शीघ्रं घटनास्थलं प्राप्तानि तथा उद्धार-रक्षण-कार्यं आरब्धम्। अग्निशमन-विभागस्य अधिकारिणः उक्तवन्तः यत् अग्निं नियन्त्रयितुं निरन्तरं प्रयासाः क्रियन्ते। परिस्थितेः नियन्त्रणार्थं बहूनि अग्निशामकयानानि नियोजितानि सन्ति। प्रारम्भिक- सूचनानुसारं अग्निकाण्डस्य कारणं अद्यापि स्पष्टं न ज्ञातम्, तस्य अन्वेषणं क्रियते।
सौभाग्यवशात् अस्यां घटनायाम् अद्यपर्यन्तं कस्यचित् जनस्य हानिः न अभवत्, तथापि सावधानतया समीप-निवासिनः सुरक्षित-स्थानेषु प्रेषिताः। प्रशासनं सम्बद्ध-विभागाश्च निरन्तरं स्थितेः निरीक्षणं कुर्वन्तः अग्निं पूर्णतया निग्रहीतुं यत्नं कुर्वन्ति।

# पंचायत-निर्वाचनात् पूर्वं हिमाचले प्रशासनिक-परिवर्तनम्, पञ्च अधिकारिणः स्थानान्तरिताः

हिमसंस्कृतवार्ताः- शिमला।पंचायत-निर्वाचनात् पूर्वं हिमाचल-सर्वकारेण प्रशासनिक- व्यवस्थायां परिवर्तनं कृत्वा पञ्च हिमाचलप्रशासनिकसेवायाः (एचएएस) अधिकारीणां स्थानान्तरणं कृतम्। एषः निर्णयः निर्वाचन-प्रक्रियायाः पूर्वतया प्रशासनिक-सुदृढीकरणस्य सुव्यवस्थापनस्य च उद्देशेन कृतः इति मन्यते।
स्थानान्तरितेषु अधिकारिषु २००९ वर्षस्य वर्गसम्बद्धः सचिन कंवलः, २०१३ वर्षस्य वर्गसम्बद्धः सुनील वर्मा, २०१७-वर्षस्य वर्गसम्बद्धः चन्दन कपूरः, २०१८-वर्षस्य वर्गसम्बद्धः भानु गुप्ता: २०२३-वर्षस्य वर्ग-सम्बद्धः संजीव-कुमारः सम्मिलिताः सन्ति।
एतेषाम् अधिकारीणां स्थानान्तरणेन राज्यस्य विभिन्नेषु विभागेषु तथा क्षेत्रेषु प्रशासनिक- कार्यप्रणाली अधिकं प्रभावी, उत्तरदायी च भविष्यति इति अपेक्षा व्यक्ता।

# हिमाचले मुख्यमंत्रिणः आरभ्य विधायकपर्यन्तं वेतनस्य अंशः षण्मासपर्यन्तं स्थगितः, अधिसूचना निर्गता




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-सर्वकारेण अग्रिमाणां षण्मासानां कृते मुख्यमंत्रिणः, उपमुख्यमंत्रिणः, मन्त्रिणः, हिमाचल-विधानसभायाः अध्यक्षस्य, उपाध्यक्षस्य तथा विधायकानां वेतनस्य कश्चन अंशः स्थगयितुं (डेफर् कर्तुं) सम्बन्धिनी अधिसूचना निर्गता। शनिवासरे हिमाचलसर्वकारस्य सामान्य- प्रशासनिकविभागेन निर्गतायां अधिसूचनायां निर्दिष्टम् यत् अग्रिमेषु षट्-मासेषु मुख्यमंत्रिणः वेतनस्य ५० प्रतिशतं, उपमुख्यमन्त्रिणः तथा मन्त्रिपरिषदः सदस्याः एवं हिमाचलविधानसभायाः अध्यक्षस्य उपाध्यक्षस्य च वेतनस्य ३० प्रतिशतं, विधायकानां च वेतनस्य २० प्रतिशतं अस्थायिरूपेण स्थगितं भविष्यति।

**वेतनस्य स्थगितो भागः न कपातः इति रूपेण**

०९): पर्यटकानां कृते विशेषबिन्दवः निर्मास्यन्ते, यत्र ते गोबिंदसागरझीलस्य सौन्दर्येण सह छायाचित्राणि ग्रहीतुं शक्नुवन्ति।

• खाद्यक्षेत्रम् (Food Zone): अत्र स्थानीयव्यञ्जनानां लघुभोज्यपदार्थानां च कृते खाद्यकेन्द्रस्य व्यवस्था भविष्यति।

**उद्देश्यं कार्यान्वयनञ्च-**

परियोजनायाः निर्देशकः अजयहाण्डा महोदयः अवदत् यत् अस्माकं मुख्यं लक्ष्यं बिलासपुरं पर्यटनक्षेत्रे नूतनां परिचयम् अस्मयितुम् अस्ति। वयं इच्छामः यत् अत्र आगच्छन्तः सर्वे जनाः सुखदं अनुभवं प्राप्नुयुः। सः सूचितवान् यत् दोलानां क्रीडोपकरणानां च सामग्री आगता अस्ति, आगामिषु दिनेषु कार्यं तीव्रगत्या भविष्यति।

**सुविधाः आर्थिकलाभः च-**

• यानवाहनस्थानम् (Parking): पर्यटकानां कृते सुचारु-वाहनस्थानस्य व्यवस्था अपि भविष्यति।

• वृत्तेः अवसराः- अनेन स्थानीयस्तरे उद्योगाः वर्धिष्यन्ते। लघुव्यवसायिनां, खाद्यविक्रेतॄणां च कृते नूतनाः उपजीविकावसराः सृजिताः भविष्यन्ति।धराड़सानीक्षेत्रं पूर्वमेव स्वकीयेन प्राकृतिकसौन्दर्येण जनान् आकर्षति। आधुनिकसुविधानां योजनेन एतत् स्थानं बिलासपुरस्य प्रमुखं पर्यटनकेन्द्रं भविष्यति, येन पर्यटकाः अत्र आगन्तुं विवशाः भविष्यन्ति।

# महाराष्ट्रस्य अमरावती-मण्डले परातवाड़ा-प्रकरणस्य प्रगति समीक्षार्थं राष्ट्रिय महिला आयोगस्य सभा



महाराष्ट्रस्य अमरावती-मण्डले परातवाड़ा-प्रकरणस्य प्रगति समीक्षार्थं राष्ट्रिय महिला आयोगस्य अध्यक्षा विजया राहटकर महोदया एकस्यां उच्चस्तरीय-समीक्षा-सभायां अध्यक्षतां कृतवती। प्रकरणमिदं युवतीनां आपत्तिजनक चलच्चित्राणां निर्माण-प्रसारण-कथित-अपराधेन सम्बद्धम् अस्ति। राष्ट्रिय महिला आयोगेन एकस्मिन् वक्तव्ये प्रोदीरितं यत् एषा घटना शोषणाय तन्त्रांशस्य दुरुपयोगः, सामग्री-प्रसारणस्य व्याप्तिः तथा च पीडितानां सुरक्षा-मर्यादा-विषये गभीरां चिन्तां जनयति। आयोगेन सम्बन्धित अधिकारिणः आदिष्टाः यत् ते 'फोरेन्सिक' विश्लेषणं इति (न्यायिक वैज्ञानिक परीक्षणं) त्वरितं कुर्वन्तु । सहैव प्रतिपञ्चदिनेषु आयोगे प्रगति विवरणं प्रस्तुवन्तु । विवरण-प्रस्तुति-समये ग्रामीण-आरक्षक-अधीक्षकः विशाल-आनन्दः न्यवेदयत् यत् मुख्य अभियुक्तेन सह अधुना यावत् अष्ट-अभियुक्ताः निगृहीताः सन्ति।

# संस्कृतभारत्याः केन्द्रीयकार्यालयस्य ‘प्रणव’ इत्यस्य सोमवासरे भव्यम् उदघाटनम्, वैश्विकविस्तारस्य केन्द्रं भविष्यति





- **उदघाटनात् पूर्वं त्रिदिवसीयस्य वैदिकानुष्ठानस्य शुभारम्भः**
- **शताचार्याणां वैदिकमन्त्रोच्चारेण निर्मितम् आध्यात्मिकं वातावरणम्**
- **‘प्रणव’ भवनं संस्कृतस्य वैश्विकप्रसारस्य सङ्कल्पकेन्द्रं भविष्यति: नीतिन नवीनः**

नवदेहली, १८ अप्रैलमासः।

संस्कृतभाषायाः प्रचार-प्रसारे अग्रणीसङ्घटनस्य संस्कृतभारत्याः नवनिर्मितकेन्द्रीयकार्यालयस्य ‘प्रणव’ इत्यस्य उद्घाटनं सोमवासरे भविष्यति। राजधान्याः दीनदयाल उपाध्याय मार्गे स्थितस्य अस्य अत्याधुनिकभवनस्य लोकार्पणं राष्ट्रियस्वयंसेवकसङ्घस्य सरसङ्घचालकः डॉ. मोहनभागवतः करिष्यति।एतद् भवनं संस्कृतभाषायाः पुनरुत्थानस्य, शोधस्य तथा च अन्ताराष्ट्रियस्तरे तस्याः प्रसारस्य कृते एकं प्रमुखकेन्द्ररूपेण विकसितं कृतम् अस्ति। उद्घाटनात् पूर्वं शनिवासरे त्रिदिवसीयस्य वैदिकानुष्ठानस्य शुभारम्भः अभवत्। सम्पूर्णदेशतः आगतैः प्रायः १०० आचार्यैः वैदिकमन्त्रोच्चारेण सह वातावरणम् आध्यात्मिकं कृतम्। आचार्यसुधीरस्य, प्रो. रामराजोपाध्यायस्य तथा प्रो. परमानन्दभारद्वाजस्य मार्गदर्शने वास्तुपूजनं, मण्डलरचना, कलशस्थापना तथा नवग्रहशान्तिसदृशाः अनुष्ठानाः सम्पन्नाः भवन्ति। संस्कृतभारत्याः अखिलभारतीय-अध्यक्षः प्रो. रमेशकुमारपाण्डेयः तथा दिल्लीप्रान्त-अध्यक्षः डॉ. वागीशभट्टः सपत्नीकौ मुख्ययजमानरूपेण पूजार्चनं चक्रतुः।अस्मिन् अवसरे भारतीयजनतादलस्य राष्ट्रियाध्यक्षः नीतिननवीनः अवदत् यत् ‘प्रणव’ भवनं संस्कृतस्य वैश्विकप्रसारस्य सङ्कल्पकेन्द्रं भविष्यति। सः उक्तवान् यत् अस्य माध्यमेन भारतीयसंस्कृतिः, वैदिकपरम्पराः जीवनमूल्यानि च नूतनसन्ततिं प्रति प्रभावीरीत्या प्रापयिष्यन्ते। सः अकथयत् यत् एतत् केन्द्रं डिजिटलमाध्यमैः संस्कृतशिक्षणे, प्राचीनपाण्डुलिपीनां संरक्षणे तथा अन्ताराष्ट्रियस्तरे भाषायाः प्रचारे महत्त्वपूर्णां भूमिकां निर्वक्ष्यति।संस्कृतभारत्याः अखिलभारतीयप्रचारप्रमुखस्य श्रीशदेवपुजारिणः अनुसारं ‘प्रणव’ भवनम् आधुनिकसुविधाभिः सुसज्जितं कृतमस्ति, येन सङ्घटनस्य गतिविधयः अधिकां गतिं प्राप्स्यन्ति। मुख्योद्घाटनसमारोहे देशभरतः प्रतिनिधयः, शिक्षाविदः संस्कृतप्रेमिणः च महत्या सङ्ख्यया सम्मिलिताः भविष्यन्ति। एतद् आयोजनं संस्कृतस्य नवजागरणस्य दिशि एकं महत्त्वपूर्णं पदं मन्यते।

# ज्योतिषशोधकेन्द्रपण्डितसभायाः सम्पन्नता

## संवत् १४३४ (२०२६-२०२७) पंचाङ्गाराणां तिथिसमन्वयः सर्वसम्मत्या निश्चितः



हिमसंस्कृतवार्ताः- राघव नाथ झा दरभङ्गा, १८ अप्रैल २०२६। दरभङ्गानगर्यां मिथिलामहासंघ (मिथिलासभा) भवनं बलभद्रपुरे लहेरियासरायक्षेत्रे शनिवासरे ज्योतिष-शोधकेन्द्र-बलभद्रपुरसंस्थया वर्षद्वयात्मकसंवत् १४३४ (२०२६–२०२७) पंचाङ्गाराणां पण्डितसभा-समावेशः सम्यगनुष्ठितः। अस्य सभासमावेशस्य अध्यक्षत्वं पं. लक्ष्मीनिवासपाण्डेयेन कृतम्। सभायाः प्रमुखोद्देश्यं मिथिलाक्षेत्रे पञ्चाङ्गगणनायाः शास्त्रीयसमन्वयः, पर्वोत्सवकालनिर्धारणेषु एकरूपताप्रतिष्ठापनं, ज्योतिषशास्त्रीय- परम्परायाः संरक्षणं चासीत्। ज्योतिषशोधकेन्द्रसंस्था १९७८ वर्षात् निरन्तरपरम्परया पञ्चाङ्गसमन्वयकार्ये प्रवृत्ता अस्ति, पुनश्च २००८ वर्षात् अधिकसंगठित-शास्त्रीयसंशोधनपरम्परया सक्रियतया कार्यरतास्ति।

### पञ्चाङ्गप्रतिनिधिसमागमः-

मिथिला–बिहारप्रदेशीयविविधपञ्चाङ्गप्रतिनिधयः समुपस्थिताः आसन्। ते सर्वे-
पं. श्रीरामचन्द्रझा (विश्वविद्यालयपञ्चाङ्गः),
पं.देवकीनन्दनझा (विद्यापतिपञ्चाङ्गः),
पं. अजयमिश्रः (वैदेहीपञ्चाङ्गः),
पं. शिवेन्द्रझा (महावीरपञ्चाङ्गः),
पं. मुक्ति कुमारझा (मिथिलापञ्चाङ्गः)
इत्येते प्रमुखपञ्चाङ्गकाराः सभायां सहभागं कृतवन्तः।

तथैव दरभङ्गास्थ- कामेश्वरसिंह-दरभङ्गा- संस्कृत-विश्वविद्यालयसम्बद्धाः मिथिलाक्षेत्रीय-बहुविद्वांसः अपि सक्रियतया भागं गृहीतवन्तः।

### उपस्थितमहाविद्वांसः-

पं. बौआनन्दझा, पं. लक्ष्मीनाथझा, पूर्वकुलपतिः पं. शशिनाथझा, पं. कुणालझा, पं. सुरेश्वरझा, पं. शिवलोचनझा, पं. शिवेश्वरझा 'वियोगी', पं. थानेश्वरझा, पं. राकेशकुमारझा, पं. दिनेशझा, पं. रामकुमारझा, पं. सरोजकुमारझा, पं. विश्वमोहनझा, पं. भूपनारायणझा, पं. रामसेवकझा, पं. नरेंद्रकिशोरझा, पं. त्रिलोकझा, पं. संजीतकुमारझा इत्यादयः सर्वे दरभङ्गानगर्यां ससम्मानं उपस्थिताः आसन्।

### सभायां सर्वसम्मत्या निम्ननिर्णयाः स्वीकृताः-

सर्वेषु पञ्चाङ्गेषु पर्वोत्सवतिथीनां यथासम्भवं एकरूपताप्रतिष्ठापनं
विवाहः, उपनयनं, मुण्डनं, द्विरागमनं, गृहप्रवेशादिषु शुभकर्ममुहूर्तानां शास्त्रीयसमन्वयेन निर्धारणम्।
पञ्चाङ्गनिर्माणप्रक्रियायाः च अधिकशास्त्रीयतया सुव्यवस्थितीकरणम्।

### संवत् १४३४ (२०२६-२०२७) प्रमुखपर्वतिथयः

रक्षाबन्धनम् — २८ अगस्त २०२६
कृष्णजन्माष्टमी — ०४ सित. २०२६
दुर्गापूजा — ११ अक्टूबर २०२६
विजयादशमी — २१ अक्टूबर २०२६
दीपावलिः — ०८ नवम्बर २०२६
छठपर्व — १५ नवम्बर २०२६
मकरसंक्रान्तिः — १५ जनवरी २०२७
वसन्तपञ्चमी — ११ फरवरी २०२७
महाशिवरात्रिः — ०६ मार्च २०२७
होलीपर्व — २२ मार्च २०२७
रामनवमी — १५ अप्रैल २०२७

### शुभकर्ममुहूर्तनिर्धारणम्

विवाहलग्नानि — ६३
उपनयनसंस्काराः — १४
मुण्डनसंस्काराः — २२
द्विरागमनम् — २७
गृहप्रवेशः — १८
गृहारम्भः — १८
देवप्रतिष्ठा — १८

### विशेषधार्मिकानुष्ठानानि-

सिमरियाकल्पवासः — १८ अक्टूबर २०२६ तः १७ नवम्बर २०२६ पर्यन्तम्
प्रयागकल्पवासः — १५ जनवरी २०२७ तः १३ फरवरी २०२७ पर्यन्तम्
सौराठसभागाछी — ०१ जुलाई २०२७ तः ०९ जुलाई २०२७ पर्यन्तम्।
दरभङ्गास्थ- ज्योतिषशोधकेन्द्रस्य सचिवेन पं. विश्वनाथझा इत्यनेन उक्तं यत् इयं पञ्चाङ्गसमन्वयपरम्परा मिथिलायाः ज्योतिषीयविरासतां संरक्षणाय, समाजे शास्त्रीयैक्यस्थापनाय च अत्यन्तमहत्त्वपूर्णं कार्यं निर्वहति।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः।
अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि।
नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि।
अद्यतन-वार्ताः अतीव रोचिकाः सन्ति।
प्रथमं तावत् उत्कलदेशस्य वार्ता श्रूयताम्।
उत्कलदेशस्य ब्रह्मपुर-कौशेयेन नवजीवनं प्राप्तम्।
चिरकालानन्तरं तस्य पुनरागमनं जातम्।
**नन्दिनी-** अहो! प्राचीन-कलायाः रक्षणं खलु अतिशोभनम्।
तन्त्रज्ञानस्य एका अन्या विचित्रा वार्ता अपि मया पठिता।
केनचित् उद्योगार्थिना कृत्रिममेधा-यन्त्रेण सह विवादः कृतः।
तेन स्वस्य विचित्रः अनुभवः अपि प्रकाशितः।
काव्या- यन्त्रेण सह विवादः! एतत् तु हास्यास्पदम् एव।
तन्त्रज्ञानस्य विकासेन जनाः किङ्कर्तव्यविमूढाः सञ्जाताः।
इदानीम् उत्तरप्रदेशस्य अन्याम् एकां वार्तां वदामि।
तत्र एका उच्चाधिकारिणी अस्ति।
तस्याः पालित-वानरेण एकं विचित्रं कार्यं कृतम्।
सः वानरः सभाकक्षं प्रविष्टवान् अस्ति।
तस्याः आसन्दे एव उपविष्टवान् अस्ति च।
**नन्दिनी-** वानरः सभाम् प्रविष्टवान् अस्ति! पशूनां व्यवहाराः सर्वदा आश्चर्यजनकाः।
पशूनां उल्लेखेन एका अपरा वार्ता मया स्मृता।
सा वार्ता गिरिवनस्य अस्ति।
गिरिवने एकस्मै एव मतदात्रे विंशति-किलोमीटर- दूरे एकं विशिष्टं मतदान-केन्द्रं स्थापितम्।
**काव्या-** सत्यम्। एकस्य नागरिकस्य कृते अपि सर्वकारेण महत् कष्टं सोढम्।
लोकतन्त्रस्य एषः एव महिमा।
अद्यतनीय- वार्तालापः अतीव ज्ञानवर्धकः आसीत्।

# मन्त्रिमण्डलेन केन्द्रीयसर्वकारीय-कर्मचारिणां कृते महर्घता-भत्तं (DA) दातुम् स्वीकृतिः

मन्त्रिमण्डलेन केन्द्रीयसर्वकारीय-कर्मचारिणां कृते महर्घता-भत्तं (DA) तथा निवृत्तिवेतनधारिणां (Pensioners) कृते महर्घता-राहतं (DR) इत्यस्य अतिरिक्त-किस्तं दातुं अपि अनुमतिः दत्ता। एषः निर्णयः अस्मिन् वर्षे जनवरी-मासस्य प्रथमदिनाङ्कात् प्रभावी भविष्यति। मूल्यवृद्धेः पूर्तये एषा वृद्धिः मूलवेतनस्य वा निवृत्तिवेतनस्य वा वर्तमानस्य ५८ प्रतिशतं दरात् प्रतिशतद्वयं (२%) अधिका अस्ति। श्रीवैष्णवः अवदत् यत् महर्घता-भत्ते महर्घता-राहत-वृद्धौ च कारणेन राजकोषे प्रतिवर्षं ६,७९१ कोटिरूप्यकाणां भारः भविष्यति। अनेन ५० लक्षेभ्यः अधिकेभ्यः केन्द्रीय-कर्मचारिभ्यः ६८ लक्षेभ्यः अधिकेभ्यः निवृत्तिवेतनधारिभ्यः च लाभः भविष्यति।

**प्रधानमंत्री ग्राम सड़क योजना-III:**
श्रीवैष्णवः अवदत् यत् मन्त्रिमण्डलेन 'प्रधानमंत्री ग्राम सड़क योजना-III' (PMGSY-III) इत्येतत् २०२५ तमवर्षस्य मार्च-मासात् अनन्तरं २०२८ तमवर्षस्य मार्च-मासं यावत् प्रचलति स्थापयितुं अपि स्वीकृतिः दत्ता। सः अकथयत् यत् अस्मिन् ग्रामीण-कृषि-विपणिभिः, उच्च-माध्यमिक-विद्यालयैः, चिकित्सालयैः च सह ग्रामीण-वसतीः संयोजकानां मुख्यमार्गाणां प्रमुखाणां ग्रामीण-सम्पर्काणां च सुदृढीकरणं सम्मिलितम् अस्ति। सः सूचितवान् यत् अस्याः योजनायाः संशोधित-व्ययः (outlay) ८३,९७७ कोटिरूप्यकाणि भविष्यति। मन्त्रिमण्डलेन समतल-क्षेत्रेषु मार्गाणां सेतूनां च निर्माणस्य समयावधिं २०२८ मार्च-मासं यावत् तथा च पर्वतीय-क्षेत्रेषु मार्गनिर्माणस्य समयावधिं २०२९ मार्च-मासं यावत् वर्धयितुम् अपि अनुमतिः प्रदत्ता।